This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

T.K.S.U. LIBRARY RAMTEK 441106 M1039 Libt Register

660

अथर्ववेद

पु.८०

M1039
Acc. No.:- 9447
Title:- अथर्ववेद
Subject:- Vedas
पत्रे :- 13 (1)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥अथाष्टादशविद्याभे
दालिख्यंते॥ऋग्वेदोयजुर्वेदःसामवेदोथ
र्ववेदइतिवेदाश्चत्वारः॥शिक्षाकल्पोव्या
करणंनिरुक्तंछंदोज्योतिषमितिवेदांगा
निषट्॥पुराणानिन्यायोमीमांसाधर्मशास्त्रा
णिचेतिचत्वार्युपांगानि॥अत्रोपपुराणा
नामपिपुराणेष्वंतर्भावः॥वैद्यशास्त्रंया
यवेदांतशास्त्रस्यमीमांसायां॥महाभार
तरामायणयोःसांख्यपातंजलवैष्णवपा
शुपतादीनांधर्मशास्त्रेष्वितिमिश्रित्वाचतु
र्दशविद्याः॥तथाचोक्तं॥पुराणन्यायमीमां
साधर्मशास्त्रांगमिश्रिताः॥वेदास्थानानि
विद्यानांधर्मस्यचचतुर्दशेति॥एताएवचतु
र्भिरुपवेदैःसहिताअष्टादशविद्याभवंति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आयुर्वेदोधनुर्वेदोगांधर्ववेदोर्थशास्त्रंचेतिचत्वार
उपवेदाः॥सर्वेषांचास्तिकानामेतावंयेवशास्त्र
प्रस्थानानि॥अन्येषामप्येकदेशिनामेष्वेवांत
र्भावात्॥ननुनास्तिकानामपिप्रस्थानांतरणि
संतिनान्येतेष्वंतर्भावात्यथागायितुंसुचिना
नि॥तथाहि॥शून्यवादेनैकंप्रस्थानंमाध्यमिका
नां॥क्षणिकविज्ञानमात्रवादेनैयोगाचाराणां॥
ज्ञानाकाराक्षरमनुमेयक्षणिकबाह्यार्थवादेनाप
रंसौत्रांतिकानां॥प्रत्यक्षलक्षणक्षणिकवाक्या
र्थवादेनापरंवैभाषिकाणां॥एवंसौगतानांप्र
स्थानचतुष्टयं॥तथादेहात्मवादेनैकंप्रस्थानं
चार्वाकाणां॥एवंदेहातिरिक्तदेहपरिणामात्म
वादेनद्वितीयंप्रस्थानंदिगंबराणां॥एवंमि
लितानास्तिकानांषट्प्रस्थानानि॥तानिक
स्मान्नोच्यंते॥सत्यंवेदबाह्यत्वात्तेषांम्लेच्छादि
प्रस्थानवत्परंपरयापिपुरुषार्थानुपयोगित्वात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नियोगो विधिरिति प्राभाकराः ॥ इष्टसाधनता
विधिरिति तार्किकादयः सर्वे ॥ विधिरपि चतुर्वि
धः ॥ उत्पत्त्यधिकारविनियोगप्रयोगभेदात् ॥ त
त्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः ॥
आग्नेय्यो ष्टाकपालो भवतीत्यादिः ॥ सेतिकर्त्त
व्यताकस्यकरणस्ययागादेः फलसंबंधको वि
धिरधिकारविधिः ॥ दर्शपूर्णमासाभ्यां स्वर्गका
मो यजेतेत्यादिः ॥ अंगसंबंधबोधको नियोग
विधिः व्रीहिभिर्यजेतसमिधो यजेतीत्यादिः ॥ सां
गप्रधानकर्मप्रयोगैक्यबोधकः पूर्वोक्तविधित्र य
मेलनरूपः प्रयोगविधिः ॥ सचत्रौतस्मार्त्तः कृत्स्न
स्यपरेकर्मस्वरूपंचादिविधं ॥ गुणकर्मअर्थक
र्मच ॥ तत्रक्रतुकारकाण्याश्रित्यविहितंगुणक
र्मानदर्पिचतुर्विधं ॥ उत्पत्त्याप्तिविशुद्धिसंस्कृति
भेदात् ॥ तत्रवसंतेब्राह्मणोग्नीनादधीतयूपं
नक्षतीत्यादौ आधानतक्षणादिनासंस्कारविशे
षविशिष्टाग्नियूपादेरुत्पत्तिः ॥ साध्यायोधे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नदुपेक्षणीयमेव॥इहचसाक्षात्परंपरयावा
पुमर्थंप्रयोगिनांवेदोपकरणानामेवप्रस्था
नानांभेदोदर्शितः॥ततोनन्यूनत्वशंकावे
कारः॥अथसंक्षेपोपोषंप्रस्थानानांस्वरूप
भेदहेतुःप्रयोजनभेदउच्यते॥बाजानेवु
स्तत्त्वये॥तत्रधर्मेब्रह्मप्रतिपादकंमपौरुषे
येयमाणाकांवेदःसचमंत्रब्राह्मणात्मकः॥
तत्रमंत्राःअनुष्ठानकारकभूतदेवताप्र
काशकास्तेपित्रिविधाःऋग्यजुःसामभेदात्॥
तत्रपादबद्धुमायत्र्यादिछंदोविशिष्टाऋ
चःअग्निमीळेपुरोहितमित्याद्याः॥तान्वर्गी
तिविशिष्टाःसामानि॥तदुभयविलक्षणा
नियज्ञंषि॥अग्निदास्नीन्निहरेत्यादिसंबोध
नरूपानिगद्यमंत्राअपियजुरंतर्भूतास्तान्व
तदेवंनिरूपितामंत्राब्राह्मणमपित्रिविधं
विधिरूपमर्थवादरूपंतदुभयरूपंचवि
लक्षणंच॥तत्रशब्दभावनाविधिरितिभाट्टाः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मित्यष्टाध्यायिका छंदोविचितिर्भवतापिंगलेन
विरचिता॥तत्र अथलौकिकमित्यंतेनअध्याय
येणगायत्युष्णिगनुष्टुबुत्तरपंक्तित्रिष्टुब्जगती
तिसप्तछंदांसि सारभूतवरभेदानिनिरूपितानि॥
अथलौकिकमित्यारभ्याध्यायपंचकेनपुराणोति
हासोपयोगीनिलौकिकानिछंदांसिप्रसंगा
न्निरूपितानि॥व्याकरणेलौकिकपदानिरूपण
वत्॥एवंवैदिकक्रमेगदत्रादिकालज्ञानायज्यो
तिषंभगतार्कलगर्गादिभिश्चप्रणीतंबहुविध
मेव॥एवंचारकांतरीयगुणोपसंहरेणवैदिका
नुष्ठानक्रमविशेषज्ञानायकल्पसूत्राणि॥ता
निचप्रयोगत्रयभेदात्त्रिविधानि॥तत्रप्रयोग
प्रतिपादकान्याश्वलायनसांख्यायनादिप्रणी
तानि॥आध्वर्यवप्रयोगप्रतिपादकानिबोधाय
नकात्यायनादिप्रणीतानि॥औह्मत्रप्रयोगप्रतिपा
दकानिलाट्यायनलात्यायनादिप्रणीतानि॥
एवंनिरूपितःषण्णामंगानांप्रयोजनभेदः॥
चतुर्णामुपांगानामधुनोच्यते॥तत्रस्वर्गप्रतिस
र्गवंशमन्वंतरवंशानुचरितप्रतिपादकानिभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गवताबादरायणिनकृतानिपुराणानि॥तानिच॥
ब्राह्मंपाद्मंवैष्णवंशैवंभागवतंनारदीयंमार्कंडेयंआ
ग्नेयंभविष्यंब्रह्मवैवर्त्तंलैंगंवाराहंस्कांदंवामनंकौ
र्मंमात्स्यंगारुडंब्रह्मांडंचेतिसप्तदश॥आद्यंसनत्कु
मारेणप्रोक्तंवेदविदांवराः॥द्वितीयंनारसिंहाख्यंतृती
यंनादमेवच॥चतुर्थंशिवधर्माख्यंदौर्वासंपंचमंविदुः॥
षष्ठंचवामनंप्रोक्तंततश्चोशनसेरितं॥ततोब्रह्मांडसं
ज्ञंतुवारुणाख्यंततःपरं॥ततःकालीपुराणाख्यंविन्नि
र्मुनिपुंगवाः॥ततोवासिष्ठलैंगाख्यंप्रोक्तंमाहेश्व
रंपरं॥ततःसांबपुराणाख्यंततःसौरंमहाद्भुतं॥
पाराशरंततःप्रोक्तंमारीचाख्यंततःपरं॥भार्गवा
ख्यंततःप्रोक्तंसर्वधर्मार्थसाधकं॥एवमुपपुराणा
एनेकप्रकारिदृष्टव्यानि॥न्यायआन्वीक्षिकीपंचा
ध्यायीगौतमेनप्रणीताप्रमाणप्रमेयसंशयप्रयो
जनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्प
वितंडाहेत्वाभासछलजातिनिग्रहस्थानाख्यानां
षोडशपदार्थानांउद्देशलक्षणपरीक्षाभिस्त
त्त्वज्ञानंतत्प्रयोजनं॥एवंदशाध्यायैवैशेषि
कशास्त्रंकणादेनप्रणीतं॥द्रव्यगुणकर्मसामा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नयोगोपयोदोग्धीसादाध्ययनदोहनाविधमा
नस्यैवस्वाध्यायपयःप्रभृतेःप्राप्तिः॥सोमभिषुणो
तिव्रीहीनवहंतीआज्यंविलापयतीसादाभिषवा
वघातविलापनैःसोमादीनांविकारैः॥व्रीहीन्प्रोक्ष
तिप्रयवक्षंतइसादौप्रोक्षणावेक्षणादिभिर्वीर्या
ज्यादिद्रव्याणांसंस्कारः॥एतत्त्रयंचांगमेव॥
तथाक्रतुकारकाएतन्नाम्नियविहितमर्थकर्म।तच्च
द्विविधंअंगंप्रधानंच॥अन्यार्थमंगंअन्यार्थं
प्रधानेअंगमपिद्विविधंसंन्निपत्योपकारकमारा
दुपकारकंच॥तत्रप्रधानस्वरूपनिर्वाहकंप्रथमं॥
फलोपकारिद्वितीयं॥एवंसर्वांगसंपूर्णोविधिःप्र
कृतिः॥विकलांगयुक्तोविधिर्विकृतिः॥उभयवि
लक्षणोविधिर्वा होमः॥एवमन्यदप्यूह्यं॥तदेवंनि
रूपितोविधिविभागः॥प्रशंसास्तुतिनिंदान्यतरलक्षण
मर्थवादस्त्रिविधोभूतंवाक्यमर्थवादः।सचत्रिविधः।गु
णवादोनुवादोभूतार्थवादश्चेति॥तत्रप्रमाणांतरवि
रुद्धार्थबोधकोगुणवादः॥आदित्योयूपइत्यादि॥मुख्यप्रमा
णांतरप्राप्तार्थबोधकोनुवादः॥अग्निर्हिमस्यभेषज
मित्यादिः॥प्रमाणांतरविरोधतत्प्राप्तिरहितार्थबोधको
भूतार्थवादः॥इंद्रोदधीचोवज्रमुदयच्छदित्यादिः॥ननु
क्तंविरोधेगुणवादःस्यादनुवादोवधारितेभूतार्थवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दस्तदर्थवादस्त्रिधामतइति।तत्रविधानमप्य
र्थवादानांविधिस्तुतिपरत्वेसमानेपिभूतार्थवादानो
स्वार्थेप्रमाण्यंदेवताधिकरणन्यायात्॥अबाधितार्था
तत्प्रापकत्वंहिप्रामाण्यं॥तत्राबाधितविषयत्वंप्रापक
त्वाङ्गगुणवादार्थवादानुवादयोः॥भूतार्थवादस्यवुत्पा
दितात्पर्यरहितस्यौत्सर्गिकप्रामाण्यंनविहन्यते॥त
देवंनिरूपितोर्थवादभागः॥विध्यर्थवादोभयविलक्ष
णानुवेदांतवाक्यंतत्रातत्प्रापकत्वेपिअनुष्ठानप्रति
पादनलक्षान्नविधिः॥स्वतःपुरुषार्थपरमानंदज्ञानात्मक
ब्रह्मणिस्वार्थेउपक्रमोपसंहारादिषड्विधतात्पर्यलिं
गवत्तयास्वतःप्रमाणभूतसर्वानपिविधीनंतःकरणसु
द्धिद्वारास्वशेषतामापादयदन्यशेषत्वाभावाच्चना
र्थवादः॥तस्मादुभयलक्षणमेववेदांतवाक्यंतच्चक
र्चिदर्थात्तत्प्रापकत्वमात्रेणविधिरितिव्यपदिश्यते॥
विधिपदरहितप्रमाणवाक्यत्वेनकचिद्भूतार्थवादइ
तिव्यपदिश्यतइतिनदोषः॥नदेवंनिरूपितंत्रिविधं
ब्राह्मणं॥एवंचकर्मकांडब्रह्मकांडात्मकोवेदोध
र्मार्थकाममोक्षहेतुः॥सचप्रयोगत्रयेणकर्तृय
ज्ञनिर्वाहार्थंस्वयंजुःसामभेदेनभिन्नः।तत्रहोत्रं
प्रयोगोऋग्वेदेनाध्वर्यवप्रयोगोयजुर्वेदेनऔ
द्गात्रप्रयोगःसामवेदेनब्रह्मयज्ञमानप्रयोगोऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रैवांतर्भूतौ॥अथर्ववेदस्तूयसानुपयुक्तः शांति
कपौष्टिकाभिचारिकादिकर्मप्रतिपादकत्वेनायंत
विलक्षणएव॥एवंप्रवचनभेदात्प्रतिवेदंभिन्नो भ
यस्योगाथाः॥एवं ~~प्रति~~ चकर्मकांडेव्यापारभेदेपि
सर्वासांवेदशाखानामेकरूपम~~त्वं~~चमेवब
लकांडं॥इतिचतुर्णांवेदानांप्रयोजनभेदेनभेद
उक्तः॥अथांगानामुच्यते॥तत्रशिक्षायाउदा
त्तानुदात्तस्वरितह्रस्वदीर्घप्लुतादिविशिष्टस्वरवर्ण
नात्मकवर्णोच्चारविशेषस्तत्रप्रयोजनं॥तदभावे
मंत्राणामनर्थकत्वात्॥तथाचोक्तं॥मंत्रोहीनःस्वरतो
वर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह॥सवाग्वज्रो
यजमानंहिनास्तियथेंद्रशत्रुःस्वरतोपराधात्॥इति॥
तत्रसर्ववेदसाधारणीशिक्षा॥अथशिक्षांप्रवक्ष्या
मीत्यादिपंचखंडात्मिकापाणिनिनाप्रकाशिता॥प्र
तिशाखंचभिन्नरूपाःप्रातिशाख्यसंज्ञिताःअन्ये
रेवमुनिभिःप्रदर्शिताः॥एवंवैदिकपदसाधुत्वज्ञा
नेनोहादिकंव्याकरणस्यप्रयोजनं॥तत्रऋग्वेदादौज्ञे
यादिअध्यायाष्टकात्मकंमहेश्वरप्रसादेनभगवता
पाणिनैवप्रकाशितं॥तत्रकात्यायनेनमुनिनापाणि
नीयसूत्रेषुवार्त्तिकंविरचितं॥तद्वार्त्तिकोपरिचभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गवतापतंजलिनाभाष्यंविरचितंतदेतत्त्रिमुनिव्याकर
णंवेदांगंमाहेश्वरमित्याख्यायते।कौमारादिव्याकर-
णानितुनवेदांगानि॥किंतु लौकिकप्रयोगमात्रस्या
नार्थनीसवगंतव्यं॥एवंशिक्षाव्याकरणाभ्यांवर्णो
च्चारणेपदसाधुत्वेचज्ञातेवैदिकमंत्रपदार्थानांअ
र्थज्ञानाकांक्षायांतद्दर्थंभवतायास्केनसमाम्नातः
सव्याख्यातव्यइत्यादिचाष्टाध्यायात्मकंनिरुक्त
मारब्धं॥तत्रचभाख्यातनिपातोपसर्गभेदेन
चतुर्विधंपदजातंनिरूप्यवैदिकपदानामर्थःप्रका
शितः॥मंत्राणांचार्थज्ञानायनिरुक्तमवश्यमपेक्षितं
अन्यथानुष्ठानासंभवात्।स्रुग्घ्येवज्रभरीतुकरीतु
रित्यादिदुरूहाणांप्रकारांतरेणार्थज्ञानासंभा
वनीयत्वाच्च।एवंनिघंटवोपिवैदिकद्रव्यदेव
तात्मकपदार्थपर्यायरूपात्मकाःनिरुक्तार्थ
त्वेव॥तत्रापिनिरुक्तंदुर्लभंकोधाध्यात्मकोयं
थोभगवतायास्केनैवकृतः॥एवंऋङ्मंत्राणांपादबद्ध
छंदोविशेषविशिष्टत्वात्तदर्थानांचनिंदास्तवरूपा
छंदोविशेषनिमित्तानुष्ठानविशेषविधानाच्च
छंदोज्ञानाकांक्षायांतत्प्रकाशनायधीस्त्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दकांक्षयानुपदर्श्यंतीभगवताबादरायणेन
कृता॥तत्रसर्वेषामपिवेदांतवाक्यानांसाक्षात्प
रंपरयावाप्रत्यगभिन्नाद्वितीयेब्रह्मणितात्पर्य
मितिसमन्वयःप्रथमाध्यायेनदर्शितः॥तत्रप्र
थमपादेस्पष्टब्रह्मलिंगयुक्तानिवाक्यानिविचा
रितानि॥द्वितीयपादेत्वस्पष्टब्रह्मलिंगान्युपा
स्यब्रह्मविषयाणि॥तृतीयपादेस्पष्टब्रह्मलिंगानिप्र
त्यगभेदेयब्रह्मविषयाणि॥एवंपादत्रयेणवाक्यवि
चारःसमापितः॥चतुर्थपादेतुप्रधानविषयत्वे
नसंदिह्यमानानिअव्यक्तजादिपदानिचिंतिता
नि॥एवंवेदांतानामद्वयेब्रह्मणिसिद्धेसमन्वयेत
त्रसंभावितस्मृतितर्कादिविरोधमाशंक्यतत्परि
हारःक्रियते॥इत्यविरोधोद्वितीयाध्यायेनप्रदर्शि
तः॥तत्राद्यपादेसांख्ययोगकणादादिस्मृतिभिः
सांख्यादिपुक्तैस्तर्कैश्चविरोधोवेदांतसमन्वय
स्यपरिहृतः॥द्वितीयपादेसांख्यादिमानानां
दुष्टत्वंप्रतिपादितं॥स्वपक्षस्थापनपरपक्षनिरा
करणरूपपर्वद्वयात्मकत्वादिचारस्य॥तृतीयपा
देमहाभूतस्थ्यादिश्रुतीनांपरस्परविरोधःपूर्वभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

LASU Library
RAMTEK
Dist Nagpur

यविशेषसमवायानांषण्णांपदार्थानांअभावस
मानोसाधर्म्यवैधर्म्याभ्यांव्युत्पादनंतस्यप्रयोज
नं॥एतदपिन्यायपदेनोक्तं॥एवंमीमांसाविद्वि
विधा॥कर्ममीमांसाशारीरकमीमांसाच॥तत्र
द्वादशाध्यायीकर्ममीमांसाअथातोधर्मजि
ज्ञासासूत्रादि*अन्यान्वाख्यैचतईश्वरना
दियेंता*जैमिनिनाप्रणीता॥तत्रधर्मप्रमा
णंधर्मभेदाभेदौ॥शेषःशेषिभावः॥क्रम
र्थपुरुषार्थभेदेनप्रयुक्तिविशेषः॥तुल्यर्थ
पठनादिक्रमभेदः॥अधिकारविशेषः॥
सामान्यातिदेशाःविशेषातिदेशाः॥पुनः
बाधःतंत्रंप्रसंगश्चेतिक्रमेणद्वादशाध्यायीनामर्थः॥
~~शारीरकमीमांसा॥अथातोब्रह्मजिज्ञा~~
सेतिसंकर्षकांडमप्यध्यायचतुष्टयात्मकंजैमिनि
प्रणीतंचदेवताकांडसंज्ञायांप्रसिद्धमप्युपास
नाख्यकर्मप्रतिपादकत्वात्कर्ममीमांसांतर्गतमेव॥
तथाचतुरध्यायीशारीरकमीमांसाअथातोब्रह्म
जिज्ञासेत्यादिआवृत्तिःश्रद्धादियंताजीवत्वै
कत्वसाक्षात्कारहेतुश्रवणाख्यविचारप्रतिपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=26.10.20 12:01
,TRANSFERRED=2020/10/26 at 12:03:13
,PAGES=13
,TYPE=STD
,NAME=S0004545
,Book Name=M-1039-ASHTADASH VODHABHED
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection